22E

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहिःस्थ**

**परीक्षा : मे–जून – २०२४**

**सत्र ४ थे**

**विषयः कुमारसम्भव (22E442)**

दिनांक : २३/०५/२०२४ गुण :१०० वेळ : दु. २.०० ते ५.००

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१. पञ्चश्लोकान् माध्यमभाषया अनुवदत तथा ससन्दर्भं स्पष्टीकुरुत च ।** (५०)

१) द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया पिनाकिनः।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी।।

२) अद्यप्रभृत्यवनताङ्गि तवास्मि दासः क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ।
अह्नाय सा नियमजं क्लममुत्ससर्ज क्लेशः फलेन हि पुनर्नवतां विधते।।

३) क्लमं ययौ कन्दुकलीलयापि या तया मुनीनां चरितं व्यगाह्यत।
ध्रुवं वपुः काञ्चनपद्मनिर्मितं मृदु प्रकृत्या च ससारमेव च।।

४) अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते।
अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम्।।

५) अथावमानेन पितुः प्रयुक्ता दक्षस्य कन्या भवपूर्वपत्नी।
सती सती योगविसृष्टदेहा तां जन्मने शैलवधूं प्रपेदे।।

६) शुचौ चतुर्णां ज्वलतां हविर्भुजां शुचिस्मिता मध्यगता सुमध्यमा।
विजित्य नेत्रप्रतिघातिनीं प्रभामनन्यदृष्टिः सवितारमैक्षत।।

७) तां हंसमालाः शरदीव गङ्गां महौषधिं नक्तमिवात्मभासः।
स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः।।

**प्र.२. अ) दशानां रूपपरिचयं कारयत ।** (१०)

| | | | |
|---|---|---|---|
| १. तपसः | २. मुमोच | ३. त्वया | ४. निशम्य |
| ५. अस्मि | ६. तपोभिः | ७. परिवर्तमानः | ८. विधाता |
| ९. दिशि | १०. जगाम | ११. विमुच्य | १२. लब्ध्वा |

**आ) दशानां सामासिकपदानां विग्रहं कृत्वा समासनाम लिखत ।** (१०)

| | | | |
|---|---|---|---|
| १. विकारहेतुः | २. प्रतिक्षणम् | ३. कृत्रिमपुत्रकः | ४. भवपूर्वपत्नी |
| ५. नियमस्था | ६. गुणसन्निपातः | ७. भग्नमनोरथा | ८. विद्याधरसुन्दरी |
| ९. धर्मवृद्धः | १०. अद्रिनाथः | ११. बन्धुप्रिया | १२. क्रियार्थम् |

**इ) दश सन्धीन् विघटयत ।** (१०)

| | | | |
|---|---|---|---|
| १.व्यस्तमपि | २. यदृढया | ३. तेऽन्या | ४. गुरोरियम् |
| ५. उल्लिखितश्च | ६. रहस्युपालभ्यत | ७. तस्याधिगमे | ८. मनोरथोऽस्याः |
| ९. पश्यन्नृजुना | १०. पुनर्ग्रहीतुम् | ११. त एव | १२. इवार्पितम् |

**प्र.३. एकस्य प्रश्नस्य उत्तरं माध्यमभाषया लिखत ।** (२०)

**१)** बटुना कृता शिवस्य निन्दां तथा पार्वत्याः क्रोधं विवृणुत।

**२)** पार्वत्याः तपः विवृणुत।

----------